© 2017 IJSRST | Volume 3 | Issue 8 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X

# वैदिकवाङ्मये प्रतिनायक भूमिकायाः विवेचनम्



**डॉ0 रेखा सिंह**
**1ए, बी.के. बनर्जी मार्ग नया कटरा,**
**इलाहाबाद**

भारतीय परम्परायां गद्यपद्यनाटकादीनां समस्तविषयाणामुत्पत्तिं वैदिकवाङ्मयादेव स्वीकरोति। नाटयपरम्परायाः प्राचीनतमे ग्रन्थे भरतकृतनाटयशास्त्रे वर्णितमस्ति यत् प्रजापिता ब्रह्मा सकलवेदानां सारं गृहीत्वा पंचवेदस्वरूपस्य नाटयवेदस्य प्रणयनमकरोत्।

**जग्राह पाठयमृगवेदात् सामभ्यो गीतमेव च।**

**यजुर्वेदादभिनयान् रसानार्थवणादपि।।**[1]

नाटयशास्त्रेऽस्मिन् नाटयसम्बद्धविषयाणां सूक्ष्मातिसूक्ष्मं विवेचनं प्राप्यते। भरतमनेर्मतानुसारं नाटकेषु (रूपकेषु अथवा कस्मिश्चित् प्रबन्धे गद्ये पद्येऽपि वा) वस्तु (कथानकं) नेता (पात्रगणाः) रसश्च अतीव महत्वं संवहन्ति। कस्मिश्चित् प्रबन्धे कथानकैस्तदनुरूपपात्राणामभिनयैश्च (आंगिकवाचिकसात्त्विकैः) रसानुभूतिः सम्भवति। अतः इमानि त्रीणि एव तत्त्वानि (वस्तु नेता रसश्च) कस्मैचित् प्रबन्धाय अन्योन्याश्रितेन परस्परमपेक्षन्ते।

प्रबन्धेषु मुख्यतया नायको नायिका प्रतिनायकाश्च महत्वपूर्णाः प्रधानभूताश्च भवन्ति। अन्ये जनाः गौणाः जायन्ते। नायकस्य नायिकाया वा दृष्टया (नाट्यस्य फलहेत्वर्थं वा) नाटकस्य प्रबन्धस्य वा रचना क्रियते। प्रबन्धे तस्मिन् प्रतिनायकाः प्रतिनायिका वा स्वकीयस्य स्थानं प्राप्य कथायां रोचकतां विस्तारतां गतिशीलतां च वितन्वन्ति। डॉ0 सत्यव्रतसिंहस्य सम्मतिरियं विद्यते यत्—संस्कृतस्य दृश्यकाव्ये श्रव्यकाव्ये वा नायकस्य चरित्रं प्रतिनायकस्य प्रतिस्पर्द्धयैव निरूप्यते।[2]

एतेषां प्रमुखपात्राणां विकासः कदा कथं वाऽभवत् इति सम्प्राप्ते विचारपथि अग्रे सरन्तो वयं पुनरपि वैदिकवाङ्मयस्यैव उपत्यकायां प्राप्नुमः। वैदिकसाहित्येषु (ऋग्वेदयजुर्वेदब्राह्मणाोपनिषदादिषु) नाट्यस्य मूलतत्वानां (पात्रसंवादकथावस्त्वभिनयादीनाम्) संकेतः प्राप्यते। ऋग्वेस्य संवादसूक्तेभ्यः पाठयवस्तु कथावस्तु च, वैदिकाख्यानानां वक्तृभ्यः ऋषिभ्यः वन्दनीयदेवेभ्यस्तथा च राक्षसेभ्यः क्रमशो नायकनायिकाप्रतिनायकादीनां पात्राणां समुद्भवो मन्येत।

वैदिकसाहित्ये यत्र हि इन्द्रविष्णुसूर्यप्रभृतिदेवानां चरित्रे कस्यापि नायकस्य चरित्रमिव पराक्रमः शारीरिकं सौन्दर्यम् आध्यात्मिकवैशिष्टयम् अद्वितीयशौर्यः मानीवयमूल्यं प्रति निष्ठा इत्यादयो गुणाः दृश्यन्ते। तत्रैव अपरस्मिन् स्थले ईर्ष्याद्वेषसंघर्षविरोधविघ्नानां भावयितॄणां राक्षसदानवदस्युदासादीनां व्यवहारे प्रतिनायकप्रभृतिपात्राणां जीवन्ततापि दृष्टिगोचरी भवति।

देवानां नायकत्वं, यज्ञेषु समागतैर्वघ्नैः समुद्भूतानां विवशतादीनतापीडावेदनाकरूणादीनामुपशमनेन तथा च स्वस्य प्रतिद्वन्द्विनां, तेषां पुराणां दुर्गाणां च दमनेन, एव सिद्धयते। एवमेव देवतानां कार्येषु (यज्ञादिषु) विघ्नोत्पादयितॄणां दासासुरराक्षसानां चरित्रे प्रतिनायकत्वं स्पष्टतया परिलक्ष्यते। अस्तु वक्तुं शक्यते यत् वैदिककालादेव प्रतिनायकस्य चरित्रं साहित्ये विद्यते एव। वैदिकवाङ्मयेऽपि प्रतिनायकः लौकिककाव्यमिव नायकविरोधित्वेनैव निरूपितं वर्तते। वैदिककालादेव पुराणानां उपजीव्यानां (रामायणमहाभारतयोः) महाकाव्यानां काव्यानां (गद्यपंद्यचम्पूनाम्) युगं यावत् प्रतिनायकः उग्रविरोध, संघर्ष, विघ्नेत्यादिभिर्गुणैरूपेतः चित्रितः। किन्तु नानादुष्प्रवृत्तियुक्तेन प्रतिनायकेन (राक्षसासुरादिभिः) पराजिता नायकाः (इन्द्रमरूत्रामकृष्णादयः) नैव प्राप्यन्ते कथाप्रसंगेषु। भारतीयसंस्कृतेः 'सत्यमेव जयते' इति दार्शनिक–दृष्टिरेवास्य कारणमस्ति।

स्थूलरूपेण कस्यँश्चित कथायां प्रबन्धे वा अन्तिमफलस्य भोक्ता नायक एव भवति। तस्य फलप्राप्तेः बाधकतत्वानामुपस्थापको भवति प्रतिनायकः। नाट्यशास्त्रीयदृष्टया नायकस्य चत्वारो भेदाः सन्ति–धीरोदात्तो, धीरललितो, धीरप्रशान्तो धीरोद्धत्तश्चेति। भरतमुनिः गुणकर्मणां विभागेन देवान् धीरोद्धतान् राज्ञः धीरललितान् अमात्यान् सेनापतीन् च धीरोदात्तान् ब्राह्मणं वणिजं च धीरप्रशान्तं स्वीकरोति।

**धीरोद्धता धीरललिता धीरोदात्तास्तथैव च।**

**धीरप्रशान्तकाश्चैव नायकाः परिकीर्तिताः।।**

**देवा धीरोद्धता ज्ञेया ललितास्तु नृपाः स्मृताः।**

प्रतिनायको (राक्षसोऽसुरो दस्युर्वा) वस्तुतो नायकस्य (देवस्य) रिपुः प्रतिपन्थी च भवति स हठी (स्तब्धः) लोलुपः पापाचारी व्यसनी धीरोद्धतनायकस्यगुणोपेतः[3] ईर्ष्यालूः प्रवृत्तिरूपेतः नायकविरोधी चापि भवति।

**''व्यसनी पापकृत् द्वेष्यः नेता स्यात् प्रतिनायकः''[4]**

प्रतिनायकस्य स्वभावः धीरोद्धतनायकस्यापेक्षयाधिका उग्रः उद्धतः रौद्रः मदोन्मत्तोऽभिमानी विकत्थनः व्यसनी पापप्रवृत्तिश्च भवति–

**''लोभी धीरोद्वतः पापी व्यसनी प्रतिनायको मुख्यनायकस्य प्रतिपन्थी नायकः प्रतिनायकः यथा रामयुधिष्ठिरयो रावणदुर्योधनवदिति'' ।[5]**

**ऋग्वेदे नायकप्रतिनायकविवेचनम्–**ऋग्वेदीयदेवेषु (नायकेषु) मुख्यतोऽस्ति देवराज

इन्द्रः। अस्य प्रामाण्येन विद्यन्ते इन्द्रस्य स्तवने ग्रथितानि पंचाशदधिकद्विशतम् सूक्तानि। येषु इन्द्रस्य स्तवनं स्वातन्त्र्येण प्रस्तूयते तथा च कतिपयानि अन्यानि सूक्तानि सन्ति येषु अन्यान्यदेवैः सह इन्द्रस्य स्तवनं प्रस्तुतम्। ऋग्वेदीयदेवेषु इन्द्रस्य महत्ता (महनीयता) तद् वर्णनैरपि प्रतीयते यत्र इन्द्रे एव अन्येषां देवानां (वायुमरूत्पर्यजन्यविश्वेदेवसूर्यादीनामपि) सत्तां स्वीकृत्य सर्वप्रधानदेवाधिदेवरूपेण इन्द्र एव प्रतिष्ठितो वर्तते। यथा–

**''यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य। सर्वं तदिन्द्रते वशे''[6]**

प्रस्तुते मन्त्रांशेऽस्मिन् इन्द्रशब्देन सूर्यः, वृत्तशब्देन च रात्रेः अन्धकारः उपमीयते। यतो हि वृत्रस्य वधः इन्द्रेणैव स्वीक्रियते। प्रकाशेन (आलोकेन) अन्धकारो विनश्यति। अतः आरोपणमिदं वैज्ञानिकदृष्टयापि समुचितमस्ति। यजुर्वेदेस्य भाष्यकारौ महीधरः उव्वटश्चापि सूर्यम् इन्द्रस्य पर्यायत्वेन वर्णयतः।

**"विश्वेभिः सौम्यं मध्वग्न इन्द्रेण वायुना।**

**पिबा मित्रस्य धामभिः।।"**[7]

अत्र इन्द्रवायुशब्दयोर्विशेष्यविशेषणभावो दृश्यते। अनेनापि सुस्पष्टं यत् वैदिकवाङ्मये इन्द्रस्य वायोश्च सत्ता अद्वितीयैव स्वीकृता। अथवा स तस्यानुचरो मन्यते।

ऋग्वेदे ऋषयः इन्द्रस्य पराक्रमस्य अतीव प्रभावोत्पादकं वर्णनं प्रास्तुवन्। न केवलम् इन्द्रस्य, तस्य शत्रूणामपि (शुष्णपणिवृत्रादीनाम्) जीवन्तवर्णनं प्रस्तुतम्। अत एव इन्द्रस्य उद्धतचरित्रस्य तस्य पराक्रमस्य च वीरनायकत्वेन प्रस्तुतीकरणे काठिन्यं नाभवत्। इन्द्रस्य चारित्रिकविशिष्टताभिरेव धीरोद्धतनायकस्य श्रेण्यां परिगण्यतेऽयं देवः। इन्द्रे धीरोद्धतनायकस्य[8] सर्वे गुणाः प्राप्यन्ते।

ऋग्वेदे इन्द्रो महान् पराक्रमी देवोऽभ्युपगम्यते। वृत्रबलपण्यबुर्ददादिदानवानां विनाशः, पर्वताणां पक्षच्छेदनं, धरायाः कष्टोपशमनं—

**"यः पृथिवीं व्यथमानामदृङ्हद्यः, यः पर्वतान् प्रकुपिताँ अरम्णात्।"**[9]

गवां मुक्तिः, आर्याणां सम्पद्रक्षा, भूमिदानं—**"दाता राधः स्तुवते काम्यं वसुः"**, **"अहं भूमिमददामार्यायाहं वृष्टिं दाशुषे मर्त्याय।"**[10] नदीनां रचना, जलाप्लावनैः रक्षार्थं नदीनां समुद्रे प्रवाहनम् इत्यादीनि इन्द्रस्य मुख्यकार्याणि सन्ति। ऋग्वेदे बहुशः प्राप्यते। यत् अग्निः मित्रो बृहस्पतिर्वरूणो मरुत् उषा इति देवताः तस्य अधमर्णाः सन्ति यतो हि शत्रुभिर्युद्धे नेतृत्वे च स एव समर्थोऽस्ति— **"इन्द्रं वृत्राय हन्तवे दधिरे पुरः"**[11] अर्थात् हे नराः! सर्वदुःखनिवारकं नेतारं तमेव शरणं गच्छन्तु।

इन्द्रः कुलीनो देवता, स इन्द्रः कुत्रापि सोमात्, कुत्र च सृष्टेः जन्मदातुः पुरुषस्य मुखाद् उत्पन्नो वर्ण्यते। **"मुखादिन्द्रश्चाग्नि"**[12] अग्निः पूषणश्च[13] तस्य भ्रातरौ। इन्द्राणी शची च तस्य पत्नीर्द्वयम्।[14] अदितिर्निगृष्टी वा तस्य माता, त्वष्टा द्यौर्वा तस्य पिता मरूद्गणाश्च तस्य सखायः कुत्सश्च तस्य पुत्रः, इति वर्णिता विद्यन्ते।

इन्द्रो दयावान् उदारश्च देवो वर्णितः। यथा—स स्वस्य उपासकेभ्यो याचकेभ्यश्च द्रविणं प्रददाति। युद्धे सहायतार्थमाहूते सति, स युद्धेऽपि तत्परो भवति। स्वस्य पराक्रमत्वेनैव स इन्द्रः धीरोद्धतनायक इव मात्सर्याहंकारविकत्थनासहिष्णुतामायाछद्मपरायणतादिर्भिर्गुणैः समन्वितो दृश्यते। यथा—

**मां नरः स्वश्चा वाजयन्तो मा वृताः समरणे हवन्ते।**

**कृणोम्याजिं मघवाहमिन्द्र इयर्मि रेणुमाभिभूत्योजाः।।**[15]

अर्थात् युद्धाय सन्नद्धा योद्धा मामनुसरन्ति। मामेवाह्वायन्ति। अहं महान् शक्तियुतश्चास्मि। समरे च रेणून् उत्थाय क्लेदयामि सर्वान्। वर्णनेनानेन ज्ञायते यत् स्वस्य पराक्रमे जाताहंकार आसीत् इन्द्रः। न केवलं पराक्रमे शक्तौ वापितु बुद्धौ विद्ययामपि प्राप्ताहंकार सः। तद्यथा—

**अहमिन्द्रो वरुणस्ते महित्वोर्वी गभीरे रजसी सुमेके।**

**त्वष्टेव विश्वा भुवनानि विद्वान्त्समैरयं रोदसी धारय×च।।**[16]

अर्थाद् महत्यां गभीरायामस्यां दुर्गमायां द्यावापृथिव्यामहमेवेन्द्रः। वस्तुतो वरुणोऽपि अहमेव। त्वष्टेव विश्वस्य प्राणिनां प्रेरकोऽपि अहमेव। विद्वान् चराचरजगतश्च धारकोऽहमेवास्मि।

सोमपानानन्तरम् इन्द्रस्य स्वगतकथानानां सूक्तेस्तस्य आत्मश्लाघा विकत्थना दर्पोऽहंकारो मात्सर्यम् च एतवन्तं चरमं स्पृशन्ति यतः तस्य विरोधः सहयोगिजनैः उपरायकैरपि भवति स्म। एतेषां सहयोगिनां पक्षतस्तु इन्द्रस्य धीरोद्धतगुणानां प्राबल्यं तमेव प्रायः प्रतिनायकानां पंक्तौ प्रापयति।

माया छलश्छद्मः कपटो बलमिति युद्धस्य महत्वपूर्णानि अंगानि सन्ति। अवसरविशेषे एतेषां प्रयोगोऽनैतिको न भवति विशेषतो यदा प्रतिपथिनः प्रतिद्वन्द्विनो वा राक्षसाः छलकपटपूर्णां नीतिमवलम्वयन्ति। प्रायः मायाविशत्रुभिः सह युद्धावसरे इन्द्रः सोमं पिबति स्म छलछद्मादीनि चाश्रयति स्म। प्रायः स **''शठे शाठयं समाचरेदिति''** नीतिमाश्रयति स्म। परन्तु सोमपानानन्तरं इन्द्रे आत्मप्रशंसायाः अहंकारस्य दर्पस्य मात्सर्यस्यासहिष्णुतायाश्च प्रवृत्तिः एतावती उद्वेलयति तं यतः स सहयोगिनां कृतोपकारं विस्मृत्य तान् अधः पातयितुं श्रमयति स्वाम्। कारणमिदं यत् प्रायः सहायकेषु विरोधभावनो वर्द्धते स्म। संघर्षश्चोपजायन्ते स्म। अनेनाधारेण इन्द्रस्य विरोधिनां वर्गद्वयं क्रियते–

1. राक्षस (असुर) वर्गीयाः प्रतिद्वन्द्विनः।
2. देववर्गीयाः प्रतिद्वन्द्विनश्च।

**राक्षसवर्गीयाः प्रतिद्वन्द्विनः–** यथार्थ नियमिता वृष्टिः, शस्यानि, सम्पदश्चोत्पत्तिः, भक्तेभ्यो याचकेभ्यः ऋषिभ्यो वा प्रदीयते सर्वदा। देवविरोधिनः प्रतिद्वन्द्विजनाः (राक्षसाः दस्युः इत्यादयः) तेषां प्राप्तये विघ्नान् जनयन्ति। वस्तुतस्तु यज्ञविघ्नात् असुराणां प्रतिद्वन्द्विता तु ऋषिभिर्याचकैश्च जायते। ऋषिषु याचकेषु वा देवानामतिस्नेहः आसीत् तथा च रक्षकत्वात् देवानाम् असुरैः सह प्रतिद्वन्द्विता स्वाभावसिद्धा आसीत्। काल्पनिकं सत्यं वा तथ्यमिदमासीत् यत् महर्षिणां कर्मकाण्डेभ्यः आस्थाश्च प्रतिफलरूपेण देवानामवतरणं भवति स्म। स्वस्य यथेष्टभागस्य ग्रहणे एव देवानामसुराणां च संघर्षो भवति स्म। एतान्येव कारणानि इन्द्रादीनामसुराणा च मध्ये प्रतिद्वन्द्वितायाः मूलानि स्वीक्रियन्ते। प्रसंगेऽस्मिन् इन्द्रस्य शत्रुषु (प्रतिनायकेषु) विचारः समीचीनः, अवश्यकर्त्तव्यश्चास्ति।

**वृत्रासुरस्य (अहेः) प्रतिनायकत्वम्–** इन्द्रस्य चरित्रे महनीयतां प्रतिपादको वृत्रः तस्य परमः प्रतिद्वन्दी दानवश्चासीत्। इन्द्रस्य जन्म तमेव दानवं हन्तुमभवत्। पुराकथाशास्त्रेषु समस्तनायकानां देवानां वा जन्म सोद्देश्यं पूर्वेण निर्धारितं च मन्यते। अस्या अपि परम्पराया उत्सो वेदेष्वेव प्राप्यते। इन्द्रस्य जन्मापि सोद्देश्यं मन्यते–

**यज्जायथा अपूर्व्य मघवन् वृत्रहत्याय।**
**तत्पृथिवीमप्रथयस्तदस्तभ्ना उत द्याम्।।**[17]

अर्थात् देवेन्द्रस्य जन्म वृत्रवधसदृशाय महते कार्यायैवाभूत्। पृथिवीस्तम्भनं तु तस्य गौणं कर्मासीत् तथापि कार्यमिदं तस्य कीर्तिस्तम्भ इव प्रथ्यते।

वैदिकसंहितानुसारं वृत्रः पृथिव्याः सर्वोच्चशिखरे विशालसर्प इव स्थित आसीत्। वृत्रस्य इदमेव रूपम् अहिः सर्परूपं वा स्वीक्रियते। द्वयोरेव चरित्रस्य समतुल्यामवलोक्य ऋग्वेदिकालोचकाः तयोः

पृथक् रूपं नैव वर्णितवन्तः।[18] वैदिककविः वृत्रस्य सर्पाकारं कुण्डलाकारं वा रूपं स्वीकरोति। यत्र कुत्रापि अपादः अहस्तश्चापि वर्णितो वृत्रः।[19] वृत्रस्य फुत्कारेणापि अस्य सर्पत्वं प्रमाणितम्। स्वस्य मायाशक्तया जलमवरूद्धय विश्वमिदं समत्रसत्। ऋषीणां प्रार्थनाभिः इन्द्रः वज्रेण वृत्रं जघान।[20] वृत्रासुरम्य वधावसरे इन्द्रः सरोवरत्रिकस्य सोमममपिवत्।[21] वृत्रस्य हननत्वादेव स इन्द्रः 'वृत्रहा''वृत्रहन्' वेति शब्दाभ्यां विभूषितो जातः। यद्यपि 'वृत्रहन्' शब्दस्योल्लेखः मरूत् (ऋ.0–1.23.9, 8.7,23) अग्निः (ऋ.0–1–56.6 6.16.14) वरूणः (ऋ0–6.67.2,12) सोमः (ऋ.0–1.29.1–9), विष्णुः (ऋ.6,69.1–8), बृहस्पतिः (ऋ.0–6,73.3) इति देवेभ्योऽपि प्रयुक्तो वर्तते यतो हि सर्वे एव इमे देवाः वृत्रवधार्थं येन केन रूपेण इन्द्रस्य साहाय्यमकुर्वन्। परन्तु वृत्रवधस्य श्रेयः इन्द्रायैव प्रसिद्धः।

कमपि पीडनं, आत्याचारः, व्यक्तिगतसुखाय सर्वेभ्यः कष्टप्रदानमिति मानवीयमूल्यानां विपरीताः प्रवृत्यः सन्ति। किन्तु सार्वकालिकी सार्वभौमा पापस्य पर्याया वास्ति प्रवृत्तिरियम्। एतेषोमेव प्रवृत्तिवशात् वृत्रासुरः अनेकत्र ''पाप्मा वै वृत्तः''[22] इत्युक्तवा साक्षात् पापपर्यायः कथितः प्रतिनायकस्य लक्षणेऽपि संकेतोऽयं प्राप्यते–

**''लुब्धः धीरोद्वतस्तब्धः पापकृत् व्यसनी रिपुः''**

कथनमिदं नानुचितं यत् दुष्प्रवृत्तीनां मूले अहंकारस्य भावना प्रबला भवति। अंहकारस्य प्रस्थितौ आत्मा विमूढ़ो जायते। कार्याकार्ययोर्धर्माधर्मयोः कर्त्तव्याकर्त्तव्ययोश्चान्तरं विस्मरित स आत्मा। यथा रावणः कंसो दुर्योधनो दुःशासनः शिशुपालो वृत्रो बलो वा सर्वे एव मर्यादाभ्यः आदर्शेभ्यश्च च्युताः सन्तो पापमाचरन्ति स्म। असुरराक्षसानां च श्रेण्यां पतित्वा प्रतिनायकाः अभवन्।

वृत्तासुरवधस्योल्लेखः ऋग्वेदे अनेकः नानारूपैश्च विद्यते। उपलबधप्रमाणैर्ज्ञायते यत् जलपर्वताकाशप्रकाशसूर्यान्धादिषु वृत्रस्य पूर्णोधिकार आसीत्। उषा नद्यः शरदृतुः सिन्धुः (सागरः) अपि तस्याधीनतां प्राकटयन्।[23] प्रकारान्तरेण स शासकोऽपि[24] वर्ण्यते। वृत्रासुरे शासकानां सर्वेगुणाः (साहसः, वाग्चातुर्यं, कूटनीतिः पराक्रमश्च) विद्यमाना आसान्। स स्ववशे कृतं जलं नैव मुश्चति सारल्येन, न च युद्धं विना अर्पयति गावः। अनेन तस्य पराक्रमों द्योतते। प्रबलप्रतिद्वन्द्विनमिन्द्रं युद्धायं सततमाह्वाति।[25]

गुरोर्वृहस्पतेरभावे इन्द्रेण विश्वरूपः पुरोहितपदे नियुक्त आसीत्। यः त्वष्टुः अदितेश्च पुत्रः आसीत्। विश्वरूपश्च यज्ञेषु अपरोक्षरूपेण देवेभ्यो भागं ददाति स्म। परोक्षरूपेण च असुराणां कल्याणं विदधाति स्म। असुरगणाः मयि आधिपत्यं स्थापयिष्यन्ति इति विचिन्त्य इन्द्रो विश्वरूपं जघान। शास्त्रेषु ब्राह्मणहननं पापाचारः कथ्यते।

स्वपुत्रस्य निर्ममवधात् व्यथितस्त्वष्टा मुनिः वृत्रमजनयत्। इन्द्रवधार्यं चाज्ञापयत्। तत्प्रेरितः वृत्रः स्वकर्त्तव्यमेव अपालयत्। स्वभ्रातुर्वधस्य प्रतिशोधाय एव प्रवृत्तः स धर्मयुद्धे स्वप्राणानामाहूतिमर्पयत्। तस्य चरित्रं पूर्णतः निर्दोषं वर्तते। वेदेषु जलावरोध एव तस्य मुख्योऽपराधो वर्णितः। किन्तु पौराणिकसाहित्ये तस्य स्मृतिरपि समाप्तप्राया आसीत् अतः शनैः शनैः पौराणिककाव्येषु महाकाव्येषु च वृत्रचरित्रस्योत्कर्ष एव दृश्यते। इन्द्रश्च छली ईर्ष्यालुश्च देवः चित्रितः।

पणिभिः नमुचेः उरेण धुनेश्चुमेरश्च सह इन्द्रस्य संघर्षे अपि नायकत्वं प्रतिनायकत्वं प्रतीयते वस्तुतः इन्द्रस्य देवत्वं महान्तं शासकत्वं च तेषामेव प्रतिनायकानां प्रतिद्वन्द्विनां कार्यैः प्रकाशितम् आसीत्।

**देववर्गीया : प्रतिद्वन्द्विन–**इन्द्रः प्रायः सोमपानान्तरम् मदोन्मतः उग्रश्च

जायते यत् सहायकान् मित्राणि प्रत्यपि विरोधं प्रकटयति। ऋग्वेदे नैकाः तादृशाः प्रसंगाः प्राप्यन्ते यदा इन्द्रः सोमं पीत्वा स्वस्यैव सहायकानां वरुणकुत्ससूर्यादीनां योगदानममत्वा गर्वोक्तिभिः तिरस्करोति तान्। अतितुच्छ च वदति। इन्द्रस्य तादृश एव व्यवहारः प्रायः देवेषु संघर्ष प्रतिद्वन्द्विता विरोधभावं च जनयति। सन्दर्भेऽस्मिन् इन्द्रस्यमुख्यरूपेण अधोलिखितदेवैः सह प्रतिद्वन्द्वितायुक्तो व्यवहारः प्रसिद्धः–

**वरुणः–** इन्द्रस्य प्रतिद्वन्द्विता वरुणेन सह, अन्यदेवानामपेक्षया अधिका आसीत्। स्वराट् इति शब्दस्य प्रयोगः सर्वाधिकः इन्द्रायैवाभवत्। परन्तु वरुणाय इन्द्रदापि अधिकः प्रयुक्तः 'स्वराट्' शब्दः।. ऋषयो वरुणं विश्वस्य तस्य समस्तप्राणिनां च एक एव नियन्ता उच्चरन्ति–

**त्वं विश्वेषां वरुणासि राजा ये च देवा असुर ये च मर्त्ताः।**

**शतं नो रास्व शरदो विचक्षेऽश्यामायूंसि सूधितानि पूर्वा।।**[26]

अर्थात् वरूणः ऋषिभ्यः शतं वर्षाणि यावत् जीवनस्य सौभाग्यं प्रदाय, वरुणः ऋतस्य नियन्ता नैतिकायाश्च सशक्तः प्रहरी स×जातः। तस्य शक्तिर्महीयते। तं न कोऽपि स्पृशति। उच्चैः उड्डयिता पक्षी, शाश्वताः सरितः, स्वतः आकाशोऽपि च तं उल्लघिंतुम् असमर्थाः सन्ति। सः सर्वज्ञः सर्वान्तर्यामी भूतस्य भवितव्यस्य वर्तमानस्य च ज्ञाता अस्ति।[27] परवर्तिकाव्यानां रूपकप्रबन्धानां च धीरोदात्तनायकस्य मूलं वरुण इव देवानां चरित्रे अनवेष्टव्यं भवति। यद्यपि वरूणः कुशलशासकानां गुणैः सम्पन्नोऽस्ति तथापि ऋषयः इन्द्रदेवायैव अधिकं महत्त्वं प्रददत् सहायतार्थमाह्वयन्ति। अत एव इन्द्रस्य चरित्रे अहंकारदर्पमात्सर्यादीनामाधिक्यं जायते। तथा चैतेषां दुर्गुणामेवावेशे इन्द्रः प्रायः सोमपानानन्तरं गर्वोक्तिर्वमति। अन्येषां देवानामपि कार्याणि स्वकृतानि उक्त्वा स्वयमेव एकच्छत्रः सम्राट् निर्घोषयति। यथा–वरुणो न कोऽप्यन्यः, अहमेवास्मि। अहमेव द्युलोकं धरामि। अहमेव विश्वमरचयत्।[28]

इन्द्रस्य गर्वोक्तिभिरेभिः स्पष्टमिदं यत् वरुणदेवेन कृतं कार्य स्वस्यैव कृतं कथयति स। तथाहि अत्र वरुणस्य एकच्छत्रसम्राड्रूपात् ईर्ष्यायाः द्वेषभावस्य च स्पष्टरूपं विद्यते। यतो हि अनेन तस्य अंहकारे आघातो भवति अन्यथा तादृशीनां गर्वोक्तीनां किं प्रयोजनम्? तद्विपरीतं वरुणदेवस्य प्रकृत्यनुरूपं मौनस्वरूपं तस्य धैर्यं पराक्रमः कुशलगुणयुक्तशासकस्य स्वरूपं नीतिज्ञता इत्येते गुणाः तं धीरोदात्तनायक इव उत्कृष्टचरित्रयुक्तं निर्मान्ति। तत्रैव गर्वोक्तियुक्तः सोमपायी दर्पी इन्द्रः मात्सर्यक्रोधादीनां गुणानामाधिक्येन प्रतिनायक इव प्रतीयते। यथा स्वस्य क्रोधवशात् रामस्य पुरतः परशुरामः, वशिष्ठस्य च समक्षं विश्वामित्रः प्रतिनायक इव प्रतीयेते।

अस्तु इन्द्रः अतिपराक्रमी भूत्वापि वरुणस्यौदात्यस्य समक्षम् उद्धतः प्रतिनायक इव प्रतीयते। इन्द्रवरुणसंवादसूक्तेन (ऋ0 4–42) वरुणस्य महानता द्योतते। या च निश्चयेन धीरोदात्त नायकस्य विकासपथि अग्रेसारयति जनान्।

**मरूतः** –वेदेषु मरुतां चरित्रं नायकानामिव अस्ति। ते प्रतिष्ठितकुले जनिताः।[29] तेषु मैत्रीभावस्याधिक्यं विद्यते। अस्य प्रमाणम् इन्द्राणीसरस्वतीरोदसीभिः सह घनिष्ठः सम्बन्धः।[30] अतीव पराक्रमशालिनः शक्तिशालिनश्च एतैर्मरुद्भिः द्यौपृथिवी अतिक्रान्तास्ति। कोऽपि वीरस्तान् पारयितुमसमर्थ एव। स्वस्य भयानकता धृष्णुतोग्रता भीमतादिभिर्गुणैः ते उद्धतनायका इव प्रतीयन्ते। ऋग्वेदीयदेवतासु इन्द्रस्यानन्तरं

सम्भवतः मरुतएव सर्वाधिका उद्धताः सन्ति। येषां पदार्पणैनैव द्युलोकः भयेन चित्करोति। स्वस्य मायाविशक्तिभिः पर्वतान् विदीर्णयन्ति ते। हस्तिन इव वृक्षान् खादन्ति।

तेषां शक्तिभयात् उन्नता वृक्षा अपि नमन्ति। पृथिवी पर्वताश्च भयेन प्रकम्पन्ते। न केवलं पराक्रमिणोऽपितु बुद्धिचातुर्येणापि युक्ताः सन्ति मरुतः।[31] परन्तु यथैकास्मिन् वने द्वौ सिंहौ नैव शक्येते तथैवदर्पी सोमपायी इन्द्र इव असहिष्णुव्यवहारयुते देवाय (नायकाय) अन्यस्य शक्तिशालिनः सत्ता अतिकठिना प्रतीयते। द्वयोरुद्धतस्वभावोऽपि प्रतिद्वन्द्वितायाः कारणं भवति। ऋग्वेदस्य पंचषष्ठ्यधिकैकशतम् सूक्ततः एकसप्तत्यधिकैकशतम् सूक्तपर्यन्तं स्थितैः संवादसूक्तैः तयोर्मध्ये संघर्षस्य प्रकाशः प्रकटितः। अत्र हि इन्द्रः मरुतं अधः पातयितुं जातश्रमः दृश्यते। युद्धे च एकाकिनं परित्यज्य पलायनाय मरुतः निन्दति। आत्मानं च स्तौति। परन्तु मरुतः स्तुतौ पठिताभिः ऋचाभिः अस्य भ्रामकारोपस्य खण्डनं सम्पादितम्।

**कद्धं नूनं कधप्रियो यदिन्द्रमजहातन। को वः सखित्व ओहते।**[32] अर्थात् हे मरूत् युद्धमानमिन्द्रं कदा त्वमत्यजत्? अर्थात् न कदापि अत्यजत्।

कीथमहोदयः इन्द्रस्य गर्वोक्तिषु आत्मस्तुतिषु च तस्मिन् स्थितस्य प्रतिशोधभावस्य द्वेषभावस्य च प्राकट्यं कथयति।[33] यतो हि प्रायः सोमस्य मदेन स इन्द्रः स्वां सम्पूर्णचराचरजगतः स्वामिनं सम्राट् च मनुते। तथा चान्येषां देवानां (असुराणां वा) स्थितिमतितुच्छां मत्वा तेषामपि कार्याणि स्वकृतानि वदति स्म। मरुताभिन्द्रस्य च प्रतिद्वन्द्वितायां, मरुतां शक्तिसम्पन्नता। (इन्द्रो बारं बारं रणाय प्रेरयति मरुतम्) मरुतः प्रति ऋषीणामनन्या भक्तिः,[34] स्त्रीभिर्मैत्रिभावः (इन्द्राणी मरुद्भिः स्वस्य घनिष्ठां मैत्रीं गर्वेण स्वीकरोति। सरस्वती रोदसी उषादीनामपि मैत्रिभावः) मित्रं बान्धवो भूत्वापि इन्द्रस्य विश्वासघातादयो विरोधस्य कारणनि मन्यन्ते। मरुतां लोकप्रियतामवलोक्येन्द्रस्य क्रोधः चरमोत्कर्ष प्राप्नोति। अयमेव क्रोधः तेषां संघर्षस्य कारणं भवति। इन्द्रस्य क्रोधः एव तं प्रतिनायकत्वमुपलाति। वस्तुतस्तु मरुताम् इन्द्रस्य च प्रकरणे न कोऽपि नायकः प्रतिनायको वा भवितुमर्हति। यतो हि द्वावेव महनीयगुणोपेतौ उद्धतस्वभावौ च स्तः। तथापि इन्द्रे मयतामपेक्षया अधिकतरमौद्धत्यं दरीदृश्यते। मरुतश्चान्ततः तस्य पुरतो नतमसतको भूत्वा समर्पयन्ति स्वाम्। अतः अनेनैवाधारेण इन्द्रः मरुतामपेक्षया श्रेष्ठो ज्येष्ठश्च स्वीकृतः। तथा मरुत्सु प्रतिनायकत्वम् इन्द्रे च नायकत्वमारोपितम्। यथा–मुद्राराक्षसे चाणक्यो राक्षसस्यापेक्षया अधिकः कठोरो निष्ठुरः क्रोधयुतश्चास्ति तथापि अन्ततः राक्षसस्य समर्पणं प्रदर्शितम्।

तदतिरिक्तोऽपि प्रायः सूर्य, उषा, अग्निकुत्सांगिरसदिवोदासतिथिग्वप्रभृतिभिः शूरवीरैरपि इन्द्रस्य संघर्षो दरीदृश्यते। यद्यपि इमे सर्वेऽपि येन–केन प्रकारेण इन्द्रस्य सहायतायै तत्परा भवन्ति सर्वदा। तथापि सोममदेनान्धः इन्द्रः सदैव तान् तुच्छानेव मनुते। तेषामवहेलनामपि करोति, तिरस्करोति च। तिरस्कारोऽवहेलना अपमानस्तथोपेक्षादीन्येव प्रतिद्वन्द्वितायाः कारणं भवन्ति। यदि इन्द्रेण तेषां विरोधं अदृष्ट्वा बलशुष्णार्बुदरौहिणावृत्रादीनां वधप्रसंगेन विचार्यते चेत् तेऽपि नायकत्वेनैव परिगण्यन्ते।

पराक्रमीन्द्रे सोमपानानन्तरम् अहंकारदर्पमात्सर्य आत्मश्लाघाऽसहिष्णुता मायाछद्म – परायणतादीनां भावानां चंचलचित्तवृत्तेश्च प्राबल्यं जायते। तथा च परिस्थितिषु इमासु स वृहत्तरमपराधमपि सम्पादितुं संकोचं नानुभवित। यथा–सोमस्यैव मदे गौतमपत्न्या अहल्यया सह व्यभिचरित। **''अहल्याया ह मैत्रेययाः' (इन्द्रः ) जार आस।''**[35]

विलिस्तेंगा नामक्या दानव्याः प्रेमपाशे पतित्वा स असुराणां दानवानां च मध्ये निवसति स्त्रीषु स्त्रीरूपं पुरूषेषु च पुरूषरूपं धरति इन्द्रः।

सुमित्ररूप[36] धृत्वा दीर्घजीविन्या आसुर्या अभिगमनमकरोत्। यस्याः शरीरे तस्य सोममिश्चितचुम्बनैरसंख्यभगाः निर्मिता आसन्। सोमोन्मादे एव स्वपितरमपि जघान।[37]

वैदिकसाहित्यं तु इन्द्रस्यैवाख्यानैः सम्पूरितं वर्तते। मन्ये तेषां प्रतिपाद्य एव इन्द्र आसीत्। परन्तु परवर्तिपौराणिकसाहित्ये ब्रह्माविष्णुमहेशदीनामेव विविधावताराः मुख्यतया प्रतिपादिता वर्तन्ते। पौराणिकसाहित्ये वैदिककथानामाख्यानानाश्चैव उपवृहणं प्राप्यते बाहुल्येन।

निष्कर्षतः वक्तुं प्रभवामि यत् प्राकृतिकबाधाभिः आधिदैविकापद्भिश्च विकसिता विरोधस्य भावनेयम् आधिभौतिकविघ्नानां रूपं धृतैव प्रतीयते। बाधाया विघ्नस्य वा न किमपि सद्यः समुत्पन्नं तत्त्वमनुमीयते अपितु कालान्तरेण मानवमनसि विकसिता भावनास्ति। यतोहि यदा सृष्टिरियं समुत्पन्ना जाता तदैव सदसत् सुखं दुःखं जीवनं मरणं विषम अमृतं इत्यादयो विरोधिभावा अपि समुत्पन्नाः जाताः। तेषां नादिः नान्तो वा विद्यते।

संस्कृतकाव्येषु रूपकेषु च प्रतिनायकानां यत् स्वरूपं प्राप्यते। तस्य परिप्रेक्ष्ये ऋग्वैदिकनायकानां प्रतिनायकानां च मध्ये यो विरोधो दृश्यते, तस्मिन् लौकिकाव्यापेक्षया अधिकस्वाभाविकता प्रतीयते। यतो हि इमे ऋग्वैदिकाः प्रतिद्वन्द्विनः मृत्युपर्यन्तं विरोधभावनायुक्ता दृश्यन्ते। तत्रैव लौकिकाव्यानां प्रतिनायकानां जीवने तादृशं क्षणमवश्यमेव प्राप्यते यदा ते स्वकृत्येषु पश्चातापं कुर्वन्ति।

असति सतः अधर्मे धर्मस्य दुष्प्रवृत्तिषु सद्प्रवृत्तीनां च विजय एव भारतीयसंस्कृतेरादर्शोऽस्ति। यस्य निर्वहणं प्राचीनवैदिकसाहित्यादारभ्य आद्यावधिं यावत् परिलक्ष्यते। वृत्रः (अहिः) वलोऽर्बुदः शुष्णो नमुचिरित्यादयो वैदिकप्रतिनायकाः कियान्तोऽपि शक्तिशलिनः पराक्रमिणो वा स्युः, किन्तु अन्नतः इन्द्रमरुतकुत्सादिभिर्देवैः नायकैर्वा तेषां वधः उपस्थितः। यथा रावणदुःशासनदुर्योधनशकुनीनां वधः रामेण पाण्डवैश्च कृतः।

धीरोदात्तदीनां नायकानामुत्सोऽपि एतेष्वेव वैदिकाख्यानेषु प्राप्यते। इन्द्रवरुणसंवादे एक उद्धतो द्वितीयश्चोदातः। वरुणस्य चरित्रं धीरोदात्तगुणोपेतमस्ति। वरुण इव अग्निः बृहस्पतिः अगिंरसोऽपि देवाः धीरोदात्ता एव सन्ति। इन्द्रमरुत्प्रतिद्वन्द्वितायां द्वयोर्धीरोद्धतभूमिकयोः संघर्षो विद्यते। यथा भीमदुर्योधनयोर्मध्ये, राक्षसचाणक्ययो च मध्ये दृश्यते। कुत्सेन्द्रयोः प्रतिद्वन्द्वितायामेकस्मिन् पक्षे (इन्द्रे) असहिष्णुतास्ति तत्रैव कुत्सस्य चरित्रे किंश्चित लालित्यं दृश्यते। अस्मादस्पष्टेचारित्रिकलालित्यादेव धीरललितानायकस्य विकासोऽनुमीयते। अतिथिग्वतुल्यस्य राजर्षेः धीरप्रशान्तनायकस्य विकासः सम्भाव्यते। प्रतिनायकस्य चरित्रविकासः उत्सो वा इन्द्रस्य स्वगतकथनैः सूक्तैस्तथा पौराणिकसाहित्ये पदलिप्सायामिन्द्रस्य औद्धत्येनैव स्पष्टं भवति। लौकिकाव्यानि स्वकथावस्तुभिः (वैदिकाख्यानाख्यायिकाधारितकथानकैर्यथा विक्रमोर्वशीयमित्यादिभिः) नायकप्रतिनायकानां भूमिकाभिः तेषां भावैरनुभूतिभिश्च (यच्च कालान्तरे रसरूपेण व्याख्यायितम्) तेषामेव नैतिकादर्शाणां मूल्यानां परम्पराणां चित्रणं प्रस्तूयन्ते येषामुत्सो वेदेषु ब्राह्मणग्रन्थेषु च प्राप्यते।

सारांशत्वेन वक्तुमर्हति यत् लौकिककाव्याधारभूततत्त्वानां (वस्तु नेता रसः इत्यादीनाम्) मूलं वैदिकसाहित्यमेव स्वीकर्त्तव्यमिति।

## सन्दर्भ ग्रंथ सूची


1. भारत नाट्य शास्त्र– 1/13, 15
2. साहित्य दर्पण तृतीय परिच्छेद पृष्ठ 198 (हिन्दीटीकायां उद्धृता)
3. दशरूपक द्वितीय प्रकाश कारिका–9
4. नंराजयशोभूषण–विलास–9
5. ना0द0च0 वि0सू0–250
6. यर्जुवेद–33/35
7. यजु0– 33/10
8. द0रू0 द्वि0प्र0का–5–6
9. ऋ0वे0–2/12/2
10. ऋ0वे0– 2/22/13, 4/26/2
11. ऋ0वे0– 8/12/22
12. ऋ0वे0– 10/90/13
13. ऋ0वे0–6/55/5
14. ऋ0वे0–1/22/12
15. ऋ0वे0–4/42/5
16. ऋ0वे0–4/42/3
17. ऋ0वे0–8/89/5 अर्थव0 वे0 सूक्त 5 मंत्र 6, 7 विशंतिकाण्डे
18. वे0दे0शा0 पृष्ठ–411
19. ऋ0वे0–1/32/7
20. ऋ0वे0–1/331/7
21. ऋ0वे0–5/29/2, 1/33/3
22. शत0 ब्रा0–11/1/5/7
23. ऋ0वे0–1/4/10, 1/51/9
24. ऋ0वे0–2/11/9
25. ऋ0वे0–1/32/6
26. वे0दे0शा0– पृ0–46
27. ऋ0वे0–1/25/7, 9,11, 1–151–9, 2–28–1, 7–87–6
28. ऋ0वे0–4–42–2, 3

29. ऋ0वे0–1 / 38 / 4, 7 / 2 / 34 / 2, 10

30. अर्थव010 / 6 / 3 ऋ0वे0–10–86–9, 7–41, 3, 7–97–2

31. ऋ0वे0–1 / 67 / 7

32. ऋ0वे0–8 / 7 / 31

33. वै0ध0द0–अ–9–पृष्ठ 188

34. ऋ0वे0–1.165.6, 6.8.10 सूक्तवाक्–मरूत्सूक्त–8,9,11,12

35. शतपथ ब्रा0 3 / 3 / 2 / 18 जै0ब्रा0 2 / 79 ऋग्वे0भा0भू0 पृ0–321–323

36. वै0ध0द0– पृष्ठ 155

37. ऋ0वे0–8 / 4 / 4, 3 / 48 / 4, 4 / 18 / 12